শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীগোপালস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীগোপালস্তোত্রম্ ॥

ৱক্ষস্স্থলে মণিমযাভরণাভিরামে
কল্যাণকল্পলতিকাং কমলাং ৱহন্তম্।
ৱক্ত্রে দধানমতিসুন্দরমন্দহাসং
সঞ্চিন্তযামি নৃপগোপকুমারৱেষম্॥ **1** ॥

ৱেদান্তমস্তকগিরাং প্রথমাভিধেযং
গোপালবালৱনিতাভৱনে নিধেযম্।
নন্দাঙ্গনানযনপঙ্কজভাগধেযং
সঞ্চিন্তযামি নৃপগোপকুমারৱেষম্॥ **2** ॥

কাঞ্চীকলাপকমনীযকটিপ্রদেশং
কান্তাসহস্রকুচমণ্ডলমণ্ডনীযম্।
কামং ৱিশালনযনং করুণৈকসিন্ধুং
সঞ্চিন্তযামি নৃপগোপকুমারৱেষম্॥ **3** ॥

আজানুদীর্ঘভুজমঞ্চিতকঞ্জনাভং
আলোলনেত্রমসিতোৎপলকর্ণপূরম্।
আরূঢপক্ষিপতিমাশ্রিতকালমেঘং
সঞ্চিন্তযামি নৃপগোপকুমারৱেষম্॥ **4** ॥

ফুল্লাতসীকুসুমকান্তিমুষং কুমারং
সৌন্দর্যশেৱধিমুদারগুণাভিরামম্।
লক্ষ্ম্যালযং কলিতকৌস্তুভমম্বুজাক্ষং
সঞ্চিন্তযামি নৃপগোপকুমারৱেষম্॥ **5** ॥

হস্তারৱিন্দযুগলীধৃতশঙ্খচক্রং
পীতাম্বরং মকরকুণ্ডলদীপ্তগণ্ডম্।
হারাভিরামমভিরামকরাঙ্গুলীযং
সঞ্চিন্তযামি নৃপগোপকুমারৱেষম্॥ **6**॥

কন্দর্পকান্তিমরুণাধরমাযতাক্ষং
কস্তূরিকাতিলকশোভিতফালভাগম্।
পূর্ণেন্দুবিম্বৱদনং মধুরাৱলোকং
সঞ্চিন্তযামি নৃপগোপকুমারৱেষম্॥ **7**॥

বালং বালং বালমেৱ স্মরামঃ
নীলং নীলং নীলমালোকযামঃ।
গোপং গোপং গোপমেৱাশ্রযামঃ
বালং নীলং গোপৱেষং ভজামঃ॥ **8**॥

নীলা লকাৱৃতমুখং তৱ কুণ্ডলশ্রী -
গণ্ডস্থলাধরসুধাং সদযাৱলোকম্।
দত্তাভযং চ ভুজদণ্ডযুগং ৱিলোক্য
ৱক্ষঃ শ্রিযো ৱিহরণং চ ভৱাম দাসাঃ॥ **9**॥

॥ ইতি শ্রীগোপালস্তোত্রং সমাপ্তম্॥